# Ekadashaganesha Stotram Shri Yugapurushakritam

# શ્રીયુગપુરુષાકૃતં એકાદશગણેશસ્તોત્રમ્

## Document Information

Text title : Ekadashaganesha Stotram Shri Yugapurushakritam

File name : ekAdashagaNeshastotramshrIyugapuruShAkRRitaM.itx

Category : ganesha, mudgalapurANa, stotra

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM aShTamaH khaNDaH | adhyAyaH 17 | 8.17 30-43||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2024

*sanskritdocuments.org*

# શ્રીયુગપુરુષાકૃતં એકાદશગણેશસ્તોત્રમ્

॥ શ્રીગણેશાય નમઃ ॥
યુગપુરુષા ઊચુઃ ।
ગણેશાય નમસ્તુભ્યં ભક્તસંરક્ષકાય ચ ।
નાનારૂપભૃતે તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૩૦॥
ભક્તેભ્યઃ સર્વદાયૈવાભક્તાનાં નાશનાય ચ ।
પરેશાય પરાણાં તે પરાય ચ નમો નમઃ ॥ ૩૧॥
સ્વાનન્દવાસિને તુભ્યં નાનામાયાપ્રચારિણે ।
સદા સ્વાનદમ્ભોગસ્થ પાલકાય નમો નમઃ ॥ ૩૨॥
અમેયશક્તયે તુભ્યં નાનામાયાપ્રહારિણે ।
માયિભ્યો મોહદાત્રે વૈ માયિને તે નમો નમઃ ॥ ૩૩॥
લમ્બોદરાય લોકાનામુદરસ્થાય તે નમઃ ।
એકદન્તાય શૂર્પાકારકર્ણાય નમો નમઃ ॥ ૩૪॥
ત્રિનેત્રાય ગજાકારવક્ત્રાય પરમાત્મને ।
ચતુર્ભુજાય સર્વેષામાદિપૂજ્યાય વૈ નમઃ ॥ ૩૫॥
દેવાય દેવરૂપાય દેવદેવાય તે નમઃ ।
દેવદેવેશકાયૈવ વિઘ્નેશાય નમો નમઃ ॥ ૩૬॥
સર્વેષાં જ્યેષ્ઠરૂપાય માત્રે પિત્રે નમો નમઃ ।
સતતં સર્વપૂજ્યાય બ્રહ્મનિષ્ઠાય તે નમઃ ॥ ૩૭॥
બ્રહ્મણે બ્રહ્મણાં નાથ બ્રહ્મભૂયપ્રદાય ચ ।
બ્રહ્મભ્યો બ્રહ્મદાત્રે તે શાન્તિસ્થાય નમો નમાઃ ॥ ૩૮॥
કિં સ્તુમસ્ત્વાં ગણેશાન યત્ર વેદાઃ શિવાદયઃ ।
યોગરૂપા ભવન્તિ સ્મ તતસ્તે નમનં શુભમ્ ॥ ૩૯॥
એવમુક્ત્વા પ્રણેમુસ્તે યુગા ગણપતિં દ્વિજ ।
સ તાનુવાચ પ્રીતાત્મા ભક્તવાત્સલ્યયન્ત્રિતઃ ॥ ૪૦॥
(ફલશ્રુતિઃ)

શ્રીગણેશ ઉવાચ ।
સ્તોત્રં ભવત્કૃતં મે યત્ સર્વદં પ્રભવિષ્યતિ ।
પઠનાચ્છ્રવણાત્ નૃભ્યો મત્પ્રીતિદાયકં ભવેત્ ॥ ૪૧॥
યં યમિચ્છતિ તં તં તુ દાસ્યામિ સ્તોત્રતોષિતઃ ।
ભુક્તિમુક્તિપ્રદં ભાવિ સર્વમાન્યં યુગાઃ કિલ ॥ ૪૨॥
વરાન્ બ્રૂત મહાભાગા દદામિ મનસેપ્સિતાન્ ।
તપસા સ્તોત્રમુખ્યેન તુષ્ટો ભક્ત્યા વિશેષતઃ ॥ ૪૩॥

ઇતિ શ્રીયુગપુરુષાકૃતં એકાદશગણેશસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ મુદ્ગલપુરાણં અષ્ટમઃ ખણ્ડઃ । અધ્યાયઃ ૧૭ । ૮.૧૭ ૩૦-૪૩॥

- .. mudgalapurANaM aShTamaH khaNDaH . adhyAyaH 17 . 8.17 30-43..

Proofread by Yash Khasbage, Preeti Bhandare

*Ekadashaganesha Stotram Shri Yugapurushakritam*

pdf was typeset on June 4, 2024

Please send corrections to *sanskrit@cheerful.com*